श्रीः ।

दुर्गासप्तशती ।

(कवचार्गलाकीलकप्रयोगविधिसहिता)

लघुजवणायचाग्रामनिवासिश्रीमत्पण्डितबदरीप्रसाद-
शास्त्रितनूजनिपण्डितमश्रीरामशास्त्रिविरचितया

शान्तनवीटीकानुसारिण्या भाषाटीकया

समलंकृता ।

Sa2Sk DUR/M49

सेयं

खेमराज श्रीकृष्णदासइत्यनेन

मुंबय्यां

स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये


मुद्रयित्वा प्रकाशिता ।

संवद् १९५० शके १८१५

अस्य ग्रंथस्य पुनर्मुद्रणादयोऽधिकाराः १८६७ तमवार्षिक२५
तमराजनियमानुसारेण प्रकाशकाधीनाःसति ।

अथ भुवनेश्वरी।





पुस्तकमिलनेका ठिकाना-

खेमराज श्रीकृष्णदास.

"श्रीवेङ्कटेश्वर" छापखाना-मुंबई.

श्रीः ।

अथ सप्तशतीस्थविषयानुक्रमणिका ।

शप्तशतीप्रारंभः ।

इत्यनुक्रमणिका समाप्ता।

पुस्तकमिलनेकाठिकाना–

खेमराज श्रीकृष्णदास

श्रीवेंकटेश्वर छापाखाना (मुंबई.)

श्रीः।

अथ प्रयोगविधिः।

श्रीगणेशाय नमः ॥ अथ प्रयोगान्तराणि कात्यायनीतन्त्रोक्तानि ॥ प्रतिश्लोकमाद्यन्तयोः प्रणवंजपेन्मन्त्रसिद्धिः ॥ १ ॥ अग्रे सर्वत्र श्लोकपदं मन्त्रोपलक्षणं ॥ सप्रणवमनुलोमव्याहृतित्रयमादौ अन्तेतुविलोमंतदित्येवं प्रतिश्लोकं कृत्वा शतावृत्तपाठेऽतिशीघ्रं सिद्धिः ॥ २ ॥ प्रतिश्लोकमादौजातवेदस इत्यृचंपठेत्सर्वकामसिद्धिः ॥ ३ ॥ अपमृत्युवारणाय त्र्यंबकमन्त्रंपठेत्॥ आदावन्तेचशतमित्यर्थः॥प्रतिश्लोकंतन्मन्त्रजपइत्यन्यत्र ॥४॥ प्रतिश्लोकंशूलेनपाहिनो देवीतिपाठादपमृत्युनाशः अस्यकेवलस्यापि श्लोकस्यलक्षमयुतंसहस्रंशतं वाजपे अपमृत्युवारणम् ॥ ५ ॥

श्रीगणेशायनमः ॥ अथ प्रयोगान्तराणाङ्कात्यायनीतन्त्रोक्तानाम्भाषाटीकेयम् ॥ सप्तशतीके पाठ करनेमें मन्त्रमन्त्रके आदि अन्तमें जो ॐकार पढे तो जिसमन्त्रकी सिद्धिचाहै उसी मन्त्रकी सिद्धिहोय ॥ १ ॥ और जो भूर्भुवः स्वः इसप्रकार सुलटे क्रमसे ॐकारसहित तीन व्याहृति मन्त्रमन्त्रके आदिमें पढे और अन्तमें स्वःभुवर्भूः इसप्रकार उलटे क्रमसे पढे ऐसे सप्तशतीके शत १०० पाठ करनेसे तत्काल कार्य्यकी सिद्धिहोय ॥ २ ॥ और जो सप्तशतीके पाठ करनेमें मन्त्रमन्त्रके आदिअन्तमें जातवेदसे इस ऋचाको पढे तो सब काम सिद्धहोय ॥ ३ ॥ और अकाल मृत्यु हटानेके लिये सप्तशती पाठके आदि अन्तमें त्र्यम्बकंयजामहे इस मन्त्रको शत १०० शत १०० जप करे अथवा मन्त्रमन्त्रके प्रति पढे तो अकालमृत्यु हटे ॥ ४ ॥ और जो सप्तशती पाठमें मन्त्रमन्त्रके प्रति शूलेनपाहिनोदेवि इस मन्त्रको पढे अथवा इस केवल मन्त्रका लक्ष १००००० अथवा दशहजार १०००० अथवा हजार१००० अथवा शत १०० जपकरे तौभी अकाल मृत्यु हटताहै॥५॥

प्रतिश्लोकं शरणागतदीनार्त्तेति श्लोकंपठेत्सर्वकार्यसिद्धिः ॥६॥ प्रतिश्लोकंकरोतुसानः शुभेत्यर्द्धंपठेत्सर्वकार्य्यसिद्धिः ॥ ७ ॥ स्वाभीष्टवरप्राप्तये एवंदेव्यावरंलब्ध्वेति श्लोकंपठेत् ॥८॥ सर्वापत्तिवारणायप्रतिश्लोकंदुर्गेस्मृतेतिपठेत् ॥अस्यकेवलस्यापिश्लोकस्यकार्य्यानुसारेण लक्षमयुतंसहस्रंशतंवाजपः ॥ ९ ॥ सर्वाबाधेत्यस्यलक्षजपेप्रतिश्लोकपाठेवाश्लोकोक्तम्फलम् ॥ १०

टीका—और जो सप्तशतीके पाठ करनेमें मन्त्रमन्त्रके प्रति शरणागत दीनार्त्त इस मन्त्रको पढे तो सम्पूर्ण कार्य सिद्धिहोय ॥ ६ ॥ और जो करोतुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहन्तुचापदः इस अर्द्धमन्त्रको सप्तशतीपाठमें मन्त्रमन्त्रके प्रति पढे तो सम्पूर्ण कार्य्यकी सिद्धिहोय ॥ ७ ॥ और मनोवांछित वरकी प्राप्तिके लिये मन्त्रमन्त्रके प्रति एवं देव्यावरंलब्ध्वा इस मन्त्रको पढे ॥ ८ ॥ और सम्पूर्ण आपत्तिनिवारणके लिये मन्त्रमन्त्रके प्रति दुर्गेस्मृता इस मन्त्रको पढे अथवा इस केवल मन्त्रका जैसा कार्य्य होय तिसके अनुसार लक्ष १००००० अथवा दशहजार १०००० अथवा हजार १००० अथवा शत १०० जपकरना उचितहै ॥ ९ ॥ और सर्वाबाधाविनिर्मुक्त इस मन्त्रका लक्ष १००००० जप करनेसे अथवा इसको सप्तशतीके पाठमें मन्त्रमन्त्रके प्रति पढनेसे धन धान्य पुत्र इनकरिके युक्त मनुष्य होताहै ॥ १० ॥

इत्थंयदायदाबाधेति प्रतिश्लोकजपेमहामारीशान्तिः ॥ ११ ॥ ततोवव्रेनृपोराज्यमिति मन्त्रस्यजपेपुनःस्वराज्यलाभः॥१२॥ हिनस्तिदैत्यतेजांसि इत्यनेनसदीपबलिदाने घण्टाबन्धने च बालग्रहशान्तिः ॥ १३ ॥ आद्यावृत्तिमनुलोमेनपठित्वा ततोविपरीतक्रमेण द्वितीयामनुलोमेन ॥ तृतीयामित्येवमावृत्तित्रयेण शीघ्रङ्कार्य्यसिद्धिः ॥ १४ ॥ सर्वापत्तिवारणाय दुर्गेस्मृतेत्यर्द्धंततोयदंतियच्च दूरकेइत्यृचं तदन्तेदारिद्र्यदुःखेत्यर्द्धमेवङ्कार्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः ॥ १५ ॥

टीका—और सप्तशतीके पाठमें मन्त्र मन्त्रके प्रति इत्थंयदायदाबाधादानवोत्थाभविष्यति इस मन्त्रको पढनेसे महामारी शांत होय ॥ ११ ॥ और सप्तशतीके पाठमें जो मन्त्र मन्त्रके प्रति 'ततोवव्रेनृपोराज्यम्०' इस मन्त्रको जपे तो गयाहुवा अपना राज्य फिर मिले ॥ १२ ॥ और 'हिनस्तिदैत्यतेजांसि' इस मन्त्रकरिके भगवतीके अर्थ दीपक सहित बलिदान देनेसे और भगवतीके मंदिरमें घण्टा बांधनेसे बालग्रहोंकी शांति होय ॥ १३ ॥ और जो पहिले सप्तशतीका सुलटे क्रमसे पाठ करै और दूसरे उलटी रीतिसे फिर तीसरे सुलटे क्रमसे पाठ करे इस प्रकार तीन पाठ करनेसे तत्काल कार्य्यकी सिद्धि होय ॥ १४ ॥ सम्पूर्ण आपत्ति निवारणके लिये 'दुर्गेस्मृताहरसिभीतिमशेषजन्तोः' इस अर्द्धमन्त्रको पढकर तिसके अन्तमें 'यदन्तियच्चदूरके' इस ऋचाको पढे फिर तिसके अन्तमें दारिद्यदुःख इस अर्द्धमन्त्रको पढे इस प्रकार जैसा कार्य्य हो तिसके अनुसार लक्ष १००००० अथवा दशहजार १०००० अथवा हजार १००० अथवा शत १०० इसका जप करना उचित है ॥ १५ ॥

कांसोस्मीत्यृचं प्रतिश्लोकं पठेल्लक्ष्मीप्राप्तिः ॥ १६ ॥ प्रतिश्लोकमनृणाअस्मिन्नित्यृचं पठेदृणपरिहारः ॥ १७ ॥ मारणार्थमेवमुक्त्वासमुत्पत्त्येतिश्लोकंप्रतिश्लोकंपठेन्मारणोक्तावृत्तिभिः फलसिद्धिः ॥ १८ ॥ ज्ञानिनामपि चेतांसि इतिश्लोकजपमात्रेण सद्योमोहनमित्यनुभवसिद्धम् ॥ प्रतिश्लोकं तच्छ्लोकपाठेत्ववश्यम् ॥ १९ ॥ रोगानशेषानिति श्लोकस्य प्रतिश्लोकंपाठेसकलरोगनाशः ॥ तन्मात्रजपेपिसः ॥ २० ॥

टीका—और जो सप्तशतीके पाठमें मन्त्र मन्त्रके प्रति 'कांसोस्मि' इस ऋचाको पढे तो लक्ष्मीकी प्राप्ति होय ॥ १६ ॥ और जो मन्त्र मन्त्रके प्रति 'अनृणाअस्मिन्' इस ऋचाको पढे तो ऋण उतरे ॥ १७ ॥ और मारणके लिये 'एवमुक्त्वासमुत्पत्य' इस मन्त्रको मन्त्र मन्त्रके प्रति पढे और मारणमें

जितनी कात्यायनी आदि तन्त्रोंमें सप्तशतीकी आवृत्ति वर्णन करी हैं तिन आवृत्तियोंके करनेसे मारणरूप फलकी सिद्धि होती है ॥ १८ ॥ और 'ज्ञानिनामपिचेतांसि' इस मन्त्रके जप मात्र करने करके तत्काल वशीकरण होय यह अनुभव किया हुवा है अथवा मन्त्र मन्त्रके प्रति इस मन्त्रको पढे तोभी वशीकरण सिद्ध होय ॥१९॥ और 'रोगानशेपान्' इस मन्त्रको मन्त्र मन्त्रके प्रति पढनेसे सम्पूर्ण रोगका नाश होय अथवा तिस केवल मन्त्रके जपमात्रसेभी सम्पूर्ण रोगका नाश होता है ॥ २० ॥

इत्युक्तासातदादेवी गंभीरेतिश्लोकस्यप्रतिश्लोकंपाठे पृथग्जपेवा विद्याप्राप्तिर्वाग्वैकृतनाशश्च ॥ २१ ॥ भगवत्याकृतं सर्वं मित्यादिद्वादशोत्तरशताक्षरोमन्त्रः सर्वकामदः ॥ सर्वापत्तिवारणश्च ॥ २२ ॥ देविप्रपन्नार्त्तिहरे इतिश्लोकस्ययथाकार्य्यं लक्षायुतसहस्रशतान्यतमसंख्यजपे प्रतिश्लोकं पाठेवासर्वापन्निवृत्तिः सर्वकामाप्तिश्च ॥ एषुप्रयोगेषु प्रतिश्लोकंदीपाग्रेकेवलमेव नमस्करणेऽतिशीघ्रंसिद्धिः ॥ प्रतिश्लोकंकामबीजसम्पुटितस्थयैकचत्वारिंशद्दिनंत्रिरावृत्तौ सर्वकामसिद्धिः ॥ २३ ॥ एकविंशतिदिनपर्य्यन्तमुक्तरीत्याप्रत्यहं द्वादशावृत्तौवशीकणम् ॥ २४ ॥ मायाबीजसम्पुटितस्य फट्पल्लवसहितस्यसप्तदिनपर्य्यन्तं त्रयोदशावृत्तावुच्चाटनसिद्धिः ॥ २५ ॥

टीका–और इत्युक्तासातदेवी इस मन्त्रको मन्त्रमन्त्रकेप्रति पठनकरनेसे अथवा अलग केवलको जपकरनेसे विद्याकी प्राप्तिहोय और वाणीमें जो गद्गदपना आदि विकार होय तिसको नाशहोय ॥२१॥ और भगवत्याकृतं सर्वम् इससे आदिलेकर यह एक सौ १२ बारह अक्षरका मन्त्रहै सो सम्पूर्ण कामना देनेवालाहै और सम्पूर्ण आपत्तिका दूर करनेवालाहै इस केवल मन्त्रको जपे अथवा सप्तशतीपाठमें मन्त्रमन्त्रके प्रतिपढे ॥ २२ ॥ और जैसा कार्यहो तिसमाफिक देविप्रपन्नार्त्तिहरेप्रसीद इसमन्त्रको जप लक्ष १०००००

अथवा दशहजार १०००० अथवा हजार १००० अथवाशत १००इसमे से एकसंख्या जपकरनेसें अथवा इसमन्त्रको सप्तशतीपाठमें मन्त्रमन्त्रके पढनेसे सम्पूर्ण आपत्ति दूरहोय और सम्पूर्ण कामना पूर्णहोय और इन प्रयोगोमें प्रतिमन्त्र दीपके आगे केवल नमस्कार करनेसे अतिशीघ्र फलकी सिद्धि होय और प्रतिमन्त्र काम बीजसम्पुटित अर्थात् क्लीं इस करके सम्पुटित सप्तशतीको इकतालीस दिनतक नित्यप्रति तीन आवृत्तिकरनेसे सम्पूर्ण कामकी सिद्धिहोय ॥२३॥ और जो इक्कीसदिनतक उसी कामबीजसम्पुटित सप्तशतीकी बारह आवृत्ति नित्यप्रतिकरनेसे वशीकारण सिद्धहोताहै ॥ २४ ॥ और जो ह्रीं इस मायाबीजकरके प्रतिमन्त्र सम्पुटितफट् पल्लव करके सहित सप्तशती पाठकी सप्तदिनतक नित्यप्रति त्रयोदश आवृत्तिकरनेसे उच्चाटन सिद्धहोय ॥ २५ ॥

तादृश्यामेव दिनचतुष्टयमेकादशावृत्तौ सर्वोपद्रवनाशः ॥ ॥२६॥ एकोनपञ्चाशद्दिनपर्य्यन्तम्प्रतिश्लोकंश्रीबीजसम्पुटितस्यपञ्चदशावृत्तौलक्ष्मीप्राप्तिः ॥ २७ ॥ प्रतिश्लोकं वाग्बीज सम्पुटितस्यशतावृत्त्याविद्याप्राप्तिः ॥ २८ ॥ इति ॥

टीका—और चार दिनतक नित्यप्रति एकादश आवृत्ति करनेसे सम्पूर्ण उपद्रवका नाश होय ॥ २६ ॥ और उणंचास दिनतक प्रति मन्त्र श्रीबीज सम्पुटित सप्तशती पाठकी पंदरह आवृत्तिकरनेसे लक्ष्मीकी प्राप्तिहोय ॥ २७ ॥ और प्रतिमन्त्र ऐं इस वाग्बीजसम्पुटित सप्तशतीकी शत १०० आवृत्ति करनेसे विद्याकी प्राप्ति होय ॥ २८ ॥ इति तन्त्रोक्तप्रयोगान्तराणि ॥

इति प्रयोगविधिः समाप्तः ।

अथस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ त्रिपुरां त्रिपुसे [?]रां त्रिवर्णां ज्ञानरूपिणीम् ॥ त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम् ॥ [?]त्मिकां कलातीतां कारुण्यहृदयां शिवाम् ॥ कल्याणजननीं देवीं क[?]णीं पूजयाम्यहम् ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकां ॥ अनन्त[?]कां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् ॥ कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥ चंडवीरां चंडमा[?]चण्डमुण्डप्रभंजनीम् ॥ पूजयामि सदादेवींचंडिकांचंडविक्रमाम् ॥ सदानंद[?]शांतांसर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकांलक्ष्मींशांभवींपूजयाम्यहम् ॥ [?]मेदुस्तरेकार्येभवदुःखविनाशिनीम् ॥ पूजयामिसदाभक्त्यादुर्गांदुर्गार्तिना[?]नीम्॥सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥ सुभद्रजननीं देवींसुभ[?]पूजयाम्यहम् ॥ एतैर्मंत्रैःपुराणोक्तैस्तांतांकन्यांसमर्चयेत् ॥ इतिपूजनंकु[?]रिकाणाम् ॥ वेद्यांविरचितेरम्येसर्वतोभद्रमंडले ॥ घटंसंस्थाप्यविधिनातत्रा[?]ह्यार्चयेच्छिवाम् ॥ तदग्रेकन्यकाश्चापिपूजयेद्ब्राह्मणानपि ॥ उपचारैस्तुवि[?]धैर्नवार्णावरणान्यपि ॥ ॐकारःप्रथमंपीठंपूर्णपीठमतःपरम् ॥ तृतीयंकाम[?]ठंचपूजयेत्संप्रदायतः ॥ पूर्वादिदिक्षुपीठस्यगणेशादिचतुष्टयम् ॥ गणेशक्षेत्र[?]लौचपादुकेवटुकास्त्रयः ॥ आग्नेय्यादिचतुर्दिक्षुपूज्यंदेवीचतुष्टयम् ॥ जया चविजयाचैवजयंतीचापराजिता ॥ पूर्वोक्तयंत्रेपूर्वेकोणेसरस्वतीसहितोब्रह्मा श्रीसहितोविष्णुर्नैर्ऋत्यामुमयाशिवोवायव्यांपट्कोणेचक्रमध्यस्थमध्यबीजेश्री-महालक्ष्मीः ॥ ह्रींमहाकालीऐंमहासरस्वतीदक्षिणवामयोः ॥ उदक्सिंहोदक्षिणेमहिषः ॥ षट्कोणेपुनंदजा रक्तदंतिका शाकंभरीदुर्गाभीमाभ्रामर्य्यः ॥ सबिंदुनामाद्यवर्णताराद्याश्चासांनाममंत्राःपूजादौ ॥ तारःप्रणवः ॥ अष्टत्रयेपु ब्रह्माणीमाहेश्वरीकौमारीवैष्णवीवाराहीनारसिंही ऐंद्रीचामुण्डाउक्तरीत्यानाम-मन्त्रैः पूज्याः ततोविष्णुमायादिचतुर्विंशतिदेवताः प्रागादिक्रमेणकेसरेषुपूज्याः प्रतिपत्रंचकेसरत्रयम् ॥ ताश्चविष्णुमाया१ चेतना२बुद्धि३निद्रा४क्षुधा५छाया ६ शक्ति ७ तृष्णा ८ क्षांति ९ जाति १० लज्जा ११ शान्ति १२ श्रद्धा

१३ कान्ति १४ लक्ष्मी १५ धृति १६ वृत्ति १७ स्मृति १८ दया १९ तुष्टि २० पुष्टि २१ मातृ २२ भ्रांति २३ चिति २४ रूपा एतावत्यः सप्तशतीस्तवेपंचमेध्यायेआसांचतुर्विंशतीनांनपाठ इतिनभ्रमितव्यम् ॥ कात्यायनीतंत्रविरोधात् ॥ नालमूलेतुसंपूज्यमाधवादिचतुष्टयम् ॥ आधारःकूर्मशेषौ च चतुर्थीपृथिवीनृप ॥ गृहकोणेषुगणेशःक्षेत्रपालोबटुकोयोगिन्यः ॥ प्रागादिदिक्षुइंद्राद्याश्चेति ॥ एवंचतुर्दिनंकुर्यात् ॥ तत्रप्रथमेन्हिएकावृत्तिर्द्वितीये द्वेतृतीयेतिस्रश्चतुर्थेचतस्रइति ॥ पंचमेहोमः ॥ होमद्रव्याणि ॥ पायसान्नैस्त्रिमध्वक्तैर्द्राक्षारंभाफलादिभिः ॥ मातुलिंगैरिक्षुखंडैर्नालिकेरयुतैस्तिलैः ॥ जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिरिति ॥ सप्तशत्यादशावृत्त्याप्रतिमन्त्रंहुतंचरेत्॥ अयुतंचनवार्णेनस्थापितेऽग्नौविधानतः ॥ कृत्वावरणदेवानांहोमंतन्नामभन्त्रतः ॥ कृत्वापूर्णाहुतिंसम्यग्देवमग्निंविसृज्यच ॥ अभिषिंचेद्यष्टारंविप्रौघः कलशोदकैः ॥ निष्कं सुवर्णमथवाप्रत्येकं दक्षिणांदिशेत् ॥ भोजयेच्चशतंविप्रान् भक्ष्यभोज्यैः पृथग्विधैः ॥ तेभ्योपिदक्षिणांदत्वागृह्णीयादाशिषस्तथा ॥ एवंकृतेजगद्वश्यंसर्वेनश्यंत्युपद्रवाः ॥इतिशतचण्डीविधिः॥श्रीजगदंबाप्रसादोस्तु॥

अथ संकल्पः ।

अद्येत्यादि० श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं चंडीसप्तशतीपाठाख्यंकर्मकरिष्ये ॥तदंगत्वेनादौकवचार्गलाकीलकपठनमाद्यंतयोरष्टोत्तरशतसंख्यनवार्णजपपूर्वकंक्रमेणरात्रिसूक्तदेवीसूक्तपठनमंतेरहस्यत्रयपठनंचकरिष्ये ॥ ॥ इतिसंकल्प्य ॥ प्रथमं नमोदेव्यैमहादेव्यैशिवायैसततंनमः ॥ नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् ॥ इतिमंत्रेणपंचोपचारैःपुस्तकपूजांकुर्यात्॥ श्रीरस्तु ॥

इतिसंकल्पः ।

श्रीः ।

अथ सप्तशतीकवचं

भाषाटीकासमन्वितम् ।

ॐनमश्चण्डिकायै ॥ मार्कण्डेयउवाच ॥ ॐयद्गुह्यंपरमंलोकेसर्वरक्षाकरंनृणाम् ॥ यन्नकस्यचिदाख्यातंतन्मेब्रूहिपितामह ॥ १॥ ब्रह्मोवाच ॥अस्तिगुह्यतमंविप्रसर्वभूतोपकारकम्॥ देव्यास्तुकवचंपुण्यंतच्छृणुष्वमहामुने ॥ २ ॥ प्रथमंशैलपुत्रीतिद्वितीयंब्रह्मचारिणी ॥ तृतीयंचन्द्रघण्टेतिकूष्माण्डेतिचतुर्थकम् ॥ ३ ॥ पंचमंस्कंदमातेतिषष्ठंकात्यायनीतिच ॥ सप्तमंकालरात्रीतिमहागौरीतिचाष्टमम् ॥ ४ ॥ नवमं सिद्धिदात्रीचनवदुर्गाःप्रकीर्तिताः ॥ उक्तान्येतानिनामानि ब्रह्मणैवमहात्मना ॥ ५ ॥

श्रीगणेशायनमः॥नत्वाहमीशं जगदेकनाथं वर्म्मार्गलाकीलकसंयुतायाः॥करोमि भाषामबुधोपकृत्यै चिन्मग्गिरामःखलु सप्तशत्याः॥

टीका—ॐ नमश्चण्डिकायै ॥ एक समय मार्कण्डेय ऋषि ब्रह्मासे इसप्रकार प्रश्न कर्ते भये कि हे ब्रह्मन् जो लोकके विषे अत्यंत गुप्त है और सब मनुष्योंकी रक्षा करनेवाली और किसी अन्यको नहीं उपदेश दईहो सो वस्तु हमको उपदेश करो ॥ १ ॥ तब ब्रह्माजी बोले कि हे विप्र हे महामुने सब मनुष्योंका उपकार करनेवाली और अत्यंत गुप्त ऐसा देवीका कवच है ताहि तुम श्रवण करो ॥ २ ॥ प्रथम तो शैलपुत्री और दूसरे ब्रह्मचारिणी तीसरे चन्द्रघण्टा चौथे कुष्मांडा ॥ ३ ॥ पाचवे स्कंदमाता छठे कात्यायनी सातवे कालरात्रि आठवे महागौरी ॥ ४ ॥ नवमें सिद्धिदात्री ये नवदुर्गा वर्णन करी है येनाम ब्रह्मा मैनेही वर्णन किये है ॥ ५ ॥

अग्निनादह्यमानस्तुशत्रुमध्येगतोरणे ॥ विषमेदुर्गमेचैवभया

तांश्शरणंगताः ॥ ६ ॥ नतेषांजायतेकिंचिदशुभंरणसंकटे॥ नापदंतस्यपश्यामिशोकदुःखभयंनहि ॥ ७ ॥ यैस्तुभक्त्या स्मृतानूनंतेषांसिद्धिःप्रजायते॥येत्वांस्मरन्तिदेवेशिरक्षसेतान्न संशयः ॥ ८ ॥ प्रेतसंस्थातुचामुण्डावाराहीमहिषासना ॥ ऐन्द्रीगजसमारूढा वैष्णवी गरुडासना ॥ ९ ॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ लक्ष्मीःपद्मासनादेवीपद्म-हस्ताहरिप्रिया ॥ १० ॥

टीका—जो मनुष्य अग्नि करके दग्ध होताहुवा और जो संग्रामके विषे शत्रुओंके मध्यमें रुकाहुवा और जो मनुष्य विकट दुर्गके विषे रुकाहुवा और जे इन आदि भयार्त्त मनुष्य इन ब्रह्मोक्त दुर्गाके नामोंका उच्चारण कर्त्ते हैं ॥ ६ ॥ तिनके रण आदि संकटोंमें कुछभी अशुभ नहीं होता है और शरणागत मनुष्यके मैं आपत्ति और शोक दुःख भय ये नहीं देखता हूं ॥ ७ ॥ और जिनो करके भक्तिसे दुर्गा स्मरण करी जाती है तिनके निश्चयकरके धन संतान आदि सब वस्तुकी वृद्धि होती है और हे देवेशि जे मनुष्य तुह्मारा स्मरण कर्त्ते हैं तिनकी तुम रक्षा करोहो इसमें संशय नहीं ॥ ८॥ और प्रेतोंके विषे स्थित ऐसी चामुंडा और महिष है सवारी जिसकी ऐसी वाराही और गजसमारूढ ऐंद्री और गरुड है वाहन जिसका ऐसी वैष्णवी ॥ ९ ॥ और वृषभके ऊपर बैठी हुई माहेश्वरी और मयूर है वाहन जिसका ऐसी कौमारी और कमल है आसन जिसका और कमल हैं हाथोंमें जिसके हरिकी प्रिया ऐसी लक्ष्मी ॥ १० ॥

श्वेतरूपधरादेवीईश्वरीवृषवाहना॥ब्राह्मीहंससमारूढा सर्वाभ-रणभूषिता ॥११॥ इत्येतामातरःसर्वाः सर्वयोगसमन्विताः ॥ नानाभरणशोभाढ्यानानारत्नोपशोभिताः ॥ १२ ॥ दृश्य न्तेरथमारूढादेव्यःक्रोधसमाकुलाः ॥ शंखंचक्रंगदांशक्तिंहलं चमुसलायुधम् ॥ खेटकंतोमरं चैवपरशुंपाशमेवच ॥ १३ ॥ कुन्तायुधं त्रिशूलंचशार्ङ्गमायुधमुत्तमम् ॥ दैत्यानांदेहनाशा-

यभक्तानामभयायच ॥ १४ ॥ धारयन्त्यायुधानीत्थंदेवानांच
हितायवै ॥ नमस्तेस्तु महारौद्रेमहाघोरपराक्रमे॥ १५ ॥

टीका—और वृष हे वाहन जिसका और श्वेतरूपको धारण करनेवाली ऐसी ईश्वरी देवी और हंसके ऊपर बैठीहुई संपूर्ण आभूषणोंकरके अलंकृत ऐसी ब्राह्मी ॥ ११ ॥ हेदेवि पूर्वोक्त तुमारी ये शक्ति संपूर्ण जगन्माता संपूर्ण योग करके युक्तहै और नाना प्रकारके रत्नजटित आभूषणोकी शोभा करके युक्तहैं ॥ १२ ॥ और क्रोध करके विव्हल रथोंमें बैठीहुई दीखतीहैं और शंख चक्र गदा शक्ति हल खेटक तोमर परशु पाश ॥ १३ ॥ कुंत त्रिशूल शार्ङ्ग धनुष इन उत्तम आयुधोको दैत्योंके देहके नाशके लिये और भक्तोंके अभयके लिये ॥ १४ ॥ और देवोंके हितके लिये धारण कियेहैं हेमहारौद्रे हेमहाघोरपराक्रमे ऐसी तुमको नमस्कारहो ॥ १५ ॥

महाबलेमहोत्साहे महाभयविनाशिनि ॥ त्राहिमांदेविदुष्प्रेक्ष्ये
शत्रूणांभयवर्द्धिनि ॥ १६ ॥ प्राच्यांरक्षतुमामैन्द्री आग्नेय्यां
भयवर्द्धिनी ॥ दक्षिणेऽवतुवाराहीनैर्ऋत्यांखड्गधारिणी ॥१७॥
प्रतीच्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी॥उदीच्यांपातुकौमारी
ईशान्यांशूलधारिणी ॥ १८ ॥ ऊर्ध्वंब्रह्माणीमेरक्षेदधस्ताद्वै-
ष्णवीतथा ॥ एवंदशदिशोरक्षेच्चामुण्डाशववाहना ॥ १९ ॥
जयामेचाग्रतःपातुविजयापातुपृष्ठतः ॥ अजितावामपार्श्वे
तुदक्षिणेचापराजिता ॥ २० ॥

टीका—और हेमहाबले हेमहोत्साहे हेमहाभयविनाशिनि हे दुष्प्रेक्ष्ये हे शत्रुओंके भय बढानेवाली तुम मेरी रक्षा करो ॥ १६ ॥ पूर्वके विषे ऐंद्री मेरी रक्षा करो और अग्निकोणके विषे भयवर्द्धिनी रक्षा करो और दक्षिणके विषे वाराही और नैर्ऋतके विषे खड्गधारिणी मेरी रक्षा करो ॥ १७ ॥ और पश्चिमके विषे वारुणी और वायु कोणके विषे मृगवाहिनी और उत्तरके विषे कौमारी और ईशानीके विषे शूलधारिणी मेरी रक्षा करो ॥ १८ ॥

और मेरे उपर ब्रह्माणी रक्षा करो तिसीप्रकार नीचे वैष्णवी रक्षा करो ऐसे शववाहना चामुंडा दशो दिशामें रक्षाकरो ॥ १९ ॥ और मेरे अगाडी जया रक्षा करो और विजया पीठ पीछेरक्षा करो और अजिता वामपार्श्वके विषे और अपराजिता दक्षिणपार्श्वके विषे रक्षा करो ॥ २० ॥

शिखामुद्योतिनी रक्षेदुमामूर्ध्नि व्यवस्थिता॥मालाधरीलला-
टेचभ्रुवौरक्षेद्यशस्विनी ॥ २१ ॥ त्रिनेत्राचभ्रुवोर्मध्येयमघण्टा
चनासिके ॥ शंखिनीचक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥२२॥
कपोलौकालिकारक्षेत्कर्णमूलेतुशांकरी ॥ नासिकायांसुगं-
न्धाचउत्तरोष्ठेचचर्चिका ॥ २३ ॥ अधरेचामृतकलाजिह्वायां
च सरस्वती॥दन्तान्रक्षतुकौमारीकण्ठदेशेतुचण्डिका॥२४॥
घण्टिकांचित्रघण्टाचमहामायाचतालुके ॥ कामाक्षीचिबुकं
रक्षेद्वाचंमेसर्वमंगला ॥ २५ ॥

टीका—और शिखाकी उद्योतिनी रक्षा करो और उमा मूर्द्धके विषे स्थित हुई रक्षा करो और मालाधरी ललाटके विषे रक्षा करो और भ्रुकुटिओंकी यशस्विनी रक्षा करो ॥२१॥ और त्रिनेत्रा भ्रुकुटीओंके मध्यमें और नासिकाकी यमघण्टा रक्षा करो और नेत्रोंके मध्यमें शंखिनी और श्रोत्रोंके विषे द्वारवासिनी रक्षा करो ॥ २२ ॥ और कपोलोंकी कालिका रक्षा करो और कर्णमूलके विषे शांकरी रक्षा करो और नासिकाके विषे सुगंधा और उत्तरोष्ठके विषे चर्चिका रक्षा करो ॥ २३ ॥ और अधरोष्ठके विषे अमृतकला और जिव्हाके विषे सरस्वती रक्षा करो और दंतोंकी कौमारी रक्षा करो और कंठदेशके विषे चंडिका रक्षा करो ॥ २४॥ और घंटिकाकी चित्रघण्टा रक्षा करो और महामाया तालुके विषे रक्षा करो और कामाक्षी ठोडीकी रक्षा करो और सर्वमङ्गला मेरी वाणीकी रक्षा करो ॥ २५ ॥

ग्रीवायांभद्रकालीचपृष्ठवंशेधनुर्धरी ॥ नीलग्रीवाबहिःकण्ठेन
लिकांनलकूबरी ॥ २६ ॥ स्कन्धयोः खङ्गिनीरक्षेद्बाहू मेवज्र

धारिणी॥हस्तयोर्दण्डिनीरक्षेदम्बिकाचांगुलीषुच॥२७॥नखा
ञ्छूलेश्वरीरक्षेत्कुक्षौरक्षेत्कुलेश्वरी ॥ स्तनौरक्षेन्महादेवी
मनश्शोकविनाशिनी ॥ २८ ॥ हृदयेललितादेवीउदरेशूल
धारिणी ॥ नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा ॥ २९ ॥
पूतना कामिकामेढ्रंगुदेमहिषवाहिनी कट्यांभगवतीरक्षेज्जा
नुनीविन्ध्यवासिनी ॥ ३० ॥

टीका—और गलेके विषे भद्रकाली और पृष्ठके वंशके विषे धनुर्धरी रक्षा करो और कंठके बहिःप्रदेशके विषे नीलग्रीवा रक्षा करो और नलिकोंकी नलकूबरी रक्षा करो ॥ २६ ॥ और कंधूके विषे खड्गिनी रक्षा करो और मेरी भुजाकी वज्रधारिणी रक्षा करो और हस्तोंके विषे दंडिनी रक्षा करो और अंगुलिओंके विषे अंबिका रक्षा करो ॥ २७ ॥ और नखोंकी शूलेश्वरी रक्षा करो और कुक्षिके विषे कुलेश्वरी रक्षा करो और स्तनोंकी मनका शोक दूर करनेवाली महादेवी रक्षा करो ॥ २८ ॥ और हृदयके विषे ललिता देवी और उदरके विषे शूलधारिणी और नाभिके विषे कामिनी रक्षा करो तिसीप्रकार गुह्यस्थानकी गुह्येश्वरी रक्षा करो ॥ २९ ॥ और पूतना कामिका शिश्नकी रक्षा करो और गुदस्थानके विषे महिषवाहिनी और कटिदेशके विषे भगवती रक्षा करो और गोडोंकी विंध्यवासिनी रक्षा करो ॥ ३० ॥

जंघेमहाबलारक्षेत्सर्वकामप्रदायिनी ॥ गुल्फयोर्नारसिंहीच
पादपृष्ठेतुतेजसी ॥ ३१ ॥ पादांगुलीषु श्रीरक्षेत्पादाधःस्थल
वासिनी ॥ नखान्दंष्ट्राकरालीच केशांश्चैवोर्ध्वकेशिनी॥ ३२ ॥
रोमकूपेषुकौमारीत्वचंवागीश्वरीतथा ॥ रक्तमज्जावसामांसा-
न्यस्थिमेदांसिपार्वती ॥ ३३ ॥ अन्त्राणिकालरात्रीचपित्तंच
मुकुटेश्वरी ॥ पद्मावतीपद्मकोशेकफेचूडामणिस्तथा ॥३४॥
ज्वालामुखीनखाजालमभेद्यासर्वसंधिषु ॥ शुक्रंब्रह्माणीमेरक्षे
च्छायांछत्रेश्वरीतथा ॥ ३५ ॥

टीका—और सर्व मनोरथोंकी देनेवाली महावला जंघाओंकी रक्षा करो और टाँकनोंके विषे नारसिंही और पैरोंके पृष्ठके विषे तैजसी रक्षा करो॥३१॥ और पैरोंकी अंगुलिओंके विषे श्री रक्षा करो और पैरका अधोभागकी स्थलवासिनी रक्षा करो और नखकी दंष्ट्राकराली और केशोंकी ऊर्ध्वकेशिनी रक्षा करो ॥ ३२ ॥ और रोमकूपोंके विषे कौमारी रक्षा करो तिसीप्रकार त्वचाकी वागीश्वरी रक्षा करो और रक्त मज्जा वसा मांस अस्थि मेद इनकी पार्वती रक्षाकरो ॥ ३३ ॥ और आतोंकी कालरात्रि रक्षा करो और पित्तकी मुकुटेश्वरी रक्षाकरो और तिसीप्रकार पद्मावती पद्मकोशके विषे और कफके विषे चूडामणि रक्षा करो ॥ ३४ ॥ और ज्वालामुखी नसाजालकी रक्षा करो और अभेद्या सब संधिओंके विषे रक्षा करो और वीर्यकी ब्रह्माणी रक्षा करो तिसीप्रकार छायाकी छत्रेश्वरी रक्षा करो ॥ ३५ ॥

अहंकारंमनोबुद्धिंरक्षेन्मेधर्मधारिणी ॥ प्राणापानौतथाव्यानमुदानंचसमानकम् ॥ ३६ ॥ वज्रहस्ता चमे रक्षत्प्राणकल्पंच शोभना ॥ रसेरूपेचगन्धे च शब्देस्पर्शेचयोगिनी॥३७॥सत्त्वं रजस्तमश्चैवरक्षेन्नारायणीसदा ॥ आयूरक्षतुवाराहीधर्मरक्षतुवैष्णवी ।३८। यशःकीर्तिंचलक्ष्मींचधनंविद्यांचचक्रिणी॥गोत्रमिन्द्राणीमेरक्षेत्पशून्मेरक्षचण्डिके ॥३९॥ पुत्रान्रक्षेन्महालक्ष्मी भार्यांरक्षतुभैरवी॥पन्थानंसुपथारक्षेन्मार्गंक्षेमकरीतथा॥४०॥

टीका—और मेरा अहंकार मन और बुद्धि इनकी धर्मधारिणी रक्षा करो तिसीप्रकार मेरा प्राण अपान व्यान उदान समान ॥ ३६ ॥ इन पंच प्राणोंकी वज्रहस्ता रक्षा करो और प्राणकल्पकी शोभना रक्षा करो रसके विषे रूपके विषे गंधके विषे शब्दके विषे स्पर्शके विषे योगिनी रक्षा करो ॥ ३७ ॥ और सर्वदा सत्वगुण रजोगुण तमोगुण इनकी नारायणी रक्षा करो और आयुकी वाराही रक्षा करो और धर्मकी वैष्णवी रक्षा करो॥३८॥

यश कीर्ति लक्ष्मी धन विद्या इनकी चाक्रिणी रक्षा करो हेइन्द्राणि तुम मेरे गोत्रकी रक्षाकरो और हेचंडिके तुम मेरे पशुओंकी रक्षाकरो ॥३९॥ पुत्रोंकी महालक्ष्मी रक्षाकरो भार्याकी भैरवी रक्षाकरो और पन्थाकी सुपथा और तिसीप्रकार मार्गकी क्षेमकरी रक्षाकरो ॥ ४० ॥

राजद्वारेमहालक्ष्मीर्विजयासर्वतःस्थिता॥रक्षाहीनंतुयत्स्थानं-वर्जितंकवचेनतु॥४१॥तत्सर्वंरक्षमेदेविजयन्तीपापनाशिनी॥ पदमेकंनगच्छेत्तुयदीच्छेच्छुभमात्मनः ॥४२॥ कवचेनावृतो नित्यंयत्रयत्रैवगच्छति ॥ तत्रतत्रार्थलाभश्चविजयःसार्वकामिकः ॥ ४३ ॥ यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितम् ॥ परमैश्वर्यमतुलंप्राप्स्यतेभूतलेपुमान् ॥ ४४ ॥ निर्भयोजायतेमर्त्यःसंग्रामेष्वपराजितः ॥ त्रैलोक्येतुभवेत्पूज्यःकवचेनावृतःपुमान् ॥ ४५ ॥

टीका—राजद्वारके विषे महालक्ष्मी रक्षाकरो तिसीप्रकार चौतरफ स्थितहुई विजया रक्षाकरो और रक्षा करके रहित और कवच करके वर्जित जो स्थान ॥ ४१ ॥ तिस संपूर्ण मेरे स्थानकी पापोंके नाश करनेवाली ऐसी जयंती हेदेवि तुम रक्षाकरो और जो मनुष्य अपना शुभ चाहैं तो कवचविना एकपैड न चले ॥ ४२ ॥ और जो कवच करके युक्तहुवा मनुष्य नित्यप्रति जहां जहां जाताहै तहां तहां उसको लाभ होताहै और उसका विजय होताहै ॥ ४३ ॥ फिर वह मनुष्य जिस जिस कामकी इच्छा कर्त्ताहै तिस तिस कामको निश्चय करि प्राप्त होताहै और पृथ्वीके विषे अतुल उत्तम ऐश्वर्यको प्राप्तहोताहै ॥ ४४ ॥ फिर वह कवच करके आवृत पुरुष संग्रामके विषे निर्भय और अपराजित होताहै और त्रिलोकीके विषे पूज्य होवे ॥४५॥

इदंतुदेव्याःकवचं देवानामपिदुर्लभम् ॥ यः पठेत्प्रयतोनित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥ ४६ ॥ दैवीकलाभवेत्तस्यत्रैलोक्ये ष्वपराजितः ॥ जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः ॥ ४७ ॥ नश्यन्तिव्याधयःसर्वेलूताविस्फोटकादयः ॥ स्थावरंजंगमं

चैवकृत्रिमंचापियद्विषम् ॥ ४८ ॥ अभिचाराणिसर्वाणिमं
त्रयंत्राणिभूतले ॥ भूचराःखेचराश्चैवकुलजाश्चोपदेशिकाः ॥
॥ ४९ ॥ सहजाकुलजामालाडाकिनीशाकिनीतथा ॥ अन्त-
रिक्षचराघोराडाकिन्यश्चमहाबलाः ॥ ५० ॥

टीका—और यह देवीका कवच देवताओंकोभी दुर्लभहै जो पुरुष श्र-द्धाकरके युक्त और एकाग्रचित्तहुवा इस कवचको नित्यप्रति त्रिकालपढे ॥ ४६ ॥ तो उस पुरुषकी देवीके समान कला होवे और वह तीनो लोकोंके विषे किसी करके पराजित नही होवे और वह अपमृत्युकरके वर्जितहुवा शतवर्ष जीवे ॥ ४७ ॥ और लूता विस्फोटकासे आदिलेकर जे व्याधिहै और स्थावर शंखिया आदि जंगम सर्प आदि कृत्रिम बनाहुवा जो तीन प्रकारका विषहै ये संपूर्ण उपद्रव उस पुरुषके नष्टहोजातेहै अर्थात् उस पुरुषको क्लेश नहीं देशकतेहैं ॥ ४८ ॥ और पृथ्वीके विषे मंत्रयंत्ररूपी जे अभिचारहैं अर्थात् मूठ आदि कर्त्तवहै और भूचर खेचर कुलज उपदेशिक येभी संपूर्ण उपद्रव उसपुरुषको स्पर्श नही कर शकतेहै ॥ ४९ ॥ और सहजा कुलजा माला तथा डाकिनी शाकिनी और अंतरिक्षमें विचरनेवाली भयंकर और बलवान् जे डाकिनी ॥ ५० ॥

ग्रहभूतपिशाचाश्चयक्षगन्धर्वराक्षसाः ॥ ब्रह्मराक्षसवेतालाः
कूष्माण्डाभैरवादयः ॥ ५१ ॥ नश्यन्तिदर्शनात्तस्यकवचेहृ-
दिसंस्थिते ॥ मानोन्नतिर्भवेद्राज्यंतेजोवृद्धिकरंपरम् ॥ ५२ ॥
यशसावर्धतेसोऽपिकीर्तिमण्डितभूतले ॥ जपेत्सप्तशतींचण्डीं
कृत्वातुकवचंपुरा ॥ ५३ ॥ यावद्भूमंडलंधत्तेसशैलवनकान-
नम् ॥ तावत्तिष्ठतिमेदिन्यांसन्ततिःपुत्रपौत्रिकी ॥ ५४ ॥
देहान्तेपरमंस्थानंयत्सुरैरपिदुर्लभम् ॥ प्राप्नोतिपुरुषोनित्यं
महामायाप्रसादतः ॥ ५५ ॥ लभतेपरमंरूपंशिवेनसहमोदते
॥ ५६ ॥ इतिवाराहपुराणेहरिहरब्रह्मविरचितंदेव्याःकवचं
समाप्तम् ॥ श्रीजगदंबार्पणमस्तु ॥

टीका—और ग्रह भूत पिशाच यक्ष गन्धर्व राक्षस ब्रह्मराक्षस वेताल कूष्मांड भैरव इन आदि जे उपद्रव है ॥ ५१ ॥ वे जिसके हृदयके विषे कवच स्थित हुएसंते तिसके दर्शनमात्रसे ये संपूर्ण नष्ट होजाते है अर्थात् स्पर्श नहीं कर सकते है और पृथ्वीके ऊपर इस कवचके प्रतापसे उस पुरुषके मानकी उन्नति होवे और तेजको बढानेवालो उस पुरुषको उत्तम राज्य होवे ॥५२॥ और जो पुरुष पहिले कवचकों करके सप्तशती चण्डीको जपे वह पुरुषभी कीर्त्ति करके शोभित भूमण्डलके विषे यश करके बढताहै ॥ ५३ ॥ और जब पर्यंत शेष भूमण्डलको धारण कर्त्ता है तब पर्यन्त पृथ्वीके विषे उस पुरुषकी पुत्रपौत्रकी संतति स्थित रहती है ॥ ५४ ॥ फिर देहके अंत समयके विषे वह पुरुष महामायाकी कृपासे देवताओं करकेभी जो दुर्लभ स्थान है तिसको निश्चयकर प्राप्त होताहै ॥ ५५ ॥ फिर मनोहर रूपको प्राप्त होताहै और शिवजीके साथ आनंद कर्त्ता है ॥ ५६ ॥ इति वाराहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचं समाप्तम् ॥ ॥ ॥ ॥ ॥ ॥

इति देव्याः कवचं समाप्तम् ।

श्रीः ।

अथ अर्गलास्तोत्रम् ।

ॐनमश्चण्डिकायै॥जयन्तीमङ्गलाकालीभद्रकालीकपालिनी॥
दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते ॥ १ ॥ जयत्वंदेवि
चामुण्डेजयभूतार्तिहारिणी॥जयसर्वगतेदेविकालरात्रिनमोस्तु
ते ॥ २ ॥ मधुकैटभविद्राविविधातृवरदेनमः ॥ रूपंदेहिजयं
देहियशोदेहिद्विषोजहि ॥३॥ महिषासुरनिर्णाशिभक्तानांसुख-
देनमः ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥४॥रक्तबीजवधे
देविचंडमुंडविनाशिनि॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥५॥

टीका—ॐ नमश्चण्डिकायै । जयन्ती, मङ्गला, काली, भद्रकाली, कपालिनी, दुर्गा, क्षमा, शिवा, धात्री, स्वाहा, स्वधा तुह्मारेको नमस्कार ॥ १ ॥ हे देवि हे चामुण्डे तुह्मारा जय हो हे भूतार्त्तिहारिणि तुह्मारा जय हो हे सर्वगते तुह्मारा जयहो हे कालरात्रि तुमको नमस्कार ॥ २ ॥ हे मधुकैटभकों मोह प्राप्त करनेवाली हे ब्रह्माकों वर देनेवाली हमको रूप द्यो जय द्यो यश द्यो हमारे शत्रुओंको मारो ॥ ३ ॥ हे महिषासुरको मारनेवाली और हे भक्तोंको सुख देनेवाली तुमको नमस्कार हमको रूप जय यश द्यो और हमारे शत्रुओंको मारो ॥ ४ ॥ हे रक्तबीजको मारनेवाली हे चण्डमुण्डकों विनाश करनेवाली हमको रूप, जय, यश द्यो और हमारे शत्रुओंको मारो ॥ ५ ॥

शुंभस्यैवनिशुंभस्य धूम्राक्षस्यचमर्दिनि॥रूपंदेहिजयं देहिय-
शोदेहिद्विषोजहि ॥ ६ ॥ वन्दिताङ्घ्रियुगेदेविसर्वसौभाग्यदायि
नि॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥७॥अचिन्त्यरूपचरि
तेसर्वशत्रुविनाशिनि॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥८॥
नतेभ्यःसर्वदाभक्त्याचण्डिकेदुरितापहे ॥ रूपंदेहिजयंदेहिय
शोदेहिद्विषोजहि ॥९॥ स्तुवद्भ्योभक्तिपूर्वंत्वांचण्डिकेव्याधिना
शिनि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥ १० ॥

टीका–हे शुंभ और निशुंभ और धूम्राक्ष इनका नाश करनेवाली हमको रूप, जय, यश द्यो और हमारे शत्रुओंको मारो॥६॥हे वन्दितहैं पादयुग्म जिसके ऐसी हे सर्व सौभाग्यकी देनेवाली हमको रूप, जय, यश द्यो और हमारे शत्रुओं-को मारो ॥७॥ नहीं चिंतवन किये जाय रूप और चरित्र जाके ऐसी हे देवि और हे सर्व शत्रुओंका विनाश करनेवाली हमको रूप, जय, यश द्यो और शत्रुओंको मारो ॥ ८ ॥ हे चण्डिके हे पापोंको नाश करनेवाली सर्वकाल भक्ति करके नत जे हम हैं हमको रूप, जय, यश द्यो और शत्रुओंको मारो ॥ ९ ॥ हे चण्डिके हे व्याधिनाशिनी भक्तिपूर्वक स्तुति कर्त्ते हुएको रूप, जय, यश द्यो और शत्रुओंको मारो ॥ १० ॥

चण्डिकेसततंयेत्वामर्चयंतीहभक्तितः ॥ रूपंदेहिजयंदेहिय-शोदेहिद्विषोजहि॥११॥देहिसौभाग्यमारोग्यंदेहिमेपरमंसुखं॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥१२॥ विधेहिद्विषतांनाशं विधेहिबलमुच्चकैः॥रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥१३॥ विधेहिदेविकल्याणंविधेहिपरमांश्रियं ॥ रूपंदेहिजयंदेहिय-शोदेहिद्विषोजहि ॥१४॥ सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके रूपंदेहि जयंदेहियशोदेहिद्विषोजहि ॥ १५ ॥

टीका–हे चण्डिके इस भूलोकके विषे जे कोई भक्तिसे तुमको पूजते हैं तिनको रूप, जय, यश द्यो और तिनके शत्रुओंको मारो ॥ ११ ॥ हे देवि हमको सौभाग्य, आरोग्य, उत्तम सुख द्यो और रूप, जय, यश द्यो और शत्रुओंको मारो ॥ १२ ॥ हे देवि शत्रुओंको नाश करो हे देवि बडा पराक्रम करो और रूप, जय, यश द्यो और शत्रुओंको मारो ॥ १३ ॥ और हे देवि कल्याण, उत्कृष्ट लक्ष्मी करो और रूप, जय, यश द्यो और शत्रुओंको मारो ॥ १४ ॥ और सुर और असुर इनके शिरोरत्न करके निघृष्ट हैं चरण जाके ऐसी तुम हे अंबिके रूप, जय, यश द्यो और शत्रुओंको मारो ॥ १५ ॥

विद्यावन्तंयशस्वन्तंलक्ष्मीवंतंजनंकुरु ॥ रूपंदेहिजयंदेहियशो देहिद्विषोजहि ॥१६॥ प्रचण्डदैत्यदर्पघ्नेचण्डिकेप्रणतायमे ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥१७॥ चतुर्भुजेचतुर्वक्त्रसं स्तुतेपरमेश्वरि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥१८॥ कृष्णेनसंस्तुतेदेविशश्वद्भक्त्यासदाम्बिके ॥ रूपंदेहिजयंदेहि यशोदेहिद्विषोजहि ॥ १९ ॥ हिमाचलसुतानाथसंस्तुतेपरमे- श्वरि ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥ २० ॥

टीका—और विद्यावान् लक्ष्मीवान् और यशस्वी पुरुष मेरेको करो और रूप जय यश द्यो और शत्रुओंकों मारो ॥ १६ ॥ और हे प्रचंण्ड दैत्योंका गर्वविध्वंसनकरनेवाली हेचण्डिके भक्तिसे प्रणत जो मेहुँ तिसकों रूप जय यश द्यो और शत्रुओंको मारो ॥ १७ ॥ हे चार भुजावाली हेब्रह्मसंस्तुते हेपरमेश्वरि हमकों रूप जय यश द्यो और शत्रुओंको मारो ॥ १८ ॥ और हे कृष्णकरके निरंतर भक्तिसे सदा स्तुति किईहुई हे अंबिके हमको रूप जय यश द्यो और शत्रुओंको मारो ॥ १९ ॥ और हे शिवकरके स्तुति किईहुई हेपरमेश्वरि हमकों रूप जय यश द्यो और शत्रुओंको मारो ॥ २० ॥

इन्द्राणीपतिसद्भावपूजितेपरमेश्वरि ॥ रूपंदेहिजयंदेहियशो- देहिद्विषोजहि ॥२१॥ देविप्रचण्डदोर्दण्डदैत्यदर्पविनाशिनी ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ॥ २२ ॥ देविभक्तजनोद्दा मदत्तानन्दोदयेम्बिके ॥ रूपंदेहिजयंदेहियशोदेहिद्विषोजहि॥ ॥ २३ ॥ पत्नींमनोरमांदेहिमनोवृत्तानुसारिणीम् ॥ तारिणीं दुर्गसंसारसागरस्यकुलोद्भवाम् ॥२४॥ इदंस्तोत्रंपठित्वातुम हास्तोत्रंपठेन्नरः ॥ सतुसप्तशतीसंख्यावरमाप्नोतिसम्पदाम्॥२५॥ इतिमार्कण्डेयपुराणे अर्गलास्तोत्रं समाप्तम् ॥ २ ॥

टीका—और हेइंद्राणि हे पतिसद्भावपूजिते हेपरमेश्वरि हमकों रूप जय

यश दो और शत्रुओंकों मारो ॥ २१ ॥ हेदेवि हेप्रचण्डभुजदण्डों करके दैत्योंका गर्वविध्वंस करनेवाली हमकों रूप जय यश दो और शत्रुओंको मारो ॥ २२ ॥ हे देवि हेभक्तजनोंको अत्यन्त दियेहै आनन्दोदय जाने ऐसी तुम हमकों रूप जय यश दो और शत्रुओंकों मारो ॥ २३ ॥ और हे देवि मनकों रंजन करनेवाली और हमारे मनके वृत्तान्तके अनुकूल चलनेवाली और दुर्गम संसाररूपी सागरके मध्यमें तरानेवाली ऐसी पत्नी हम कों दो ॥ २४ ॥ और जो मनुष्य इसस्तोत्रकों पढके महास्तोत्र पढे वह मनुष्य संपत्तियोंका सप्तशतीसंख्यावरकों प्राप्तहोवे ॥ २५ ॥ इति मार्कण्डेय पुराणे अर्गलास्तोत्रं समाप्तम् ॥

इति अर्गलास्तोत्रम् ।

श्रीः ।

अथ कीलकस्तोत्रम् ।

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्तायनमःसोमार्द्धधारिणे ॥ १ ॥ सर्वमेतद्विजानीयान्मन्त्राणामपिकीलकम्॥सोपिक्षेमम वाप्नोतिसततंजाप्यतत्परः॥ २॥ सिद्ध्यन्त्युच्चाटनादीनिवस्तूनिसकलान्यपि ॥ एतेनस्तुवतांदेवींस्तोत्रमात्रेणसिद्ध्यति३॥ नमंत्रंनोषधंतत्रनकिञ्चिदपिविद्यते ॥ विनाजाप्येनसिद्ध्येतसर्वमुच्चाटनादिकम् ॥ ४ ॥ समग्राण्यपिसिद्ध्यंतिलोकशंकामिमांहरः ॥ कृत्वानिमंत्रयामाससर्वमेवमिदंशुभम् ॥ ५ ॥

टीका—ॐनमश्चण्डिकायै। मार्कण्डेयऋषि जैमिनीसे वर्णन करतेभये परंतु प्रथमशिवकों नमस्कार किया कैसे कि विशुद्धज्ञानहै देह जिनका और तीनों वेदहै दिव्यनेत्र जिनके और कल्याणप्राप्तिको कारण और अर्द्धचंद्रको मस्तकमें धारणकरनेवाले ऐसे शिवको नमस्कार ॥ १ ॥ फिर कहनेलगे मनुष्य मन्त्रोंकाभी यह संपूर्ण कीलक जानों जो निरन्तर इसके जाप्यमें तत्पर रहताहै सो निश्चयकारि क्षेमको प्राप्तहोताहै ॥ २ ॥ और इसके जपमात्रसे उच्चाटन आदि कृत्य सिद्धहोतेहै और यावत्संपूर्ण वस्तुभी सिद्धहोतीहै और इसकरके स्तुति करतेहुओंके देवी स्तोत्रमात्रकरके सिद्धहोतीहै ॥ ३ ॥ और न मन्त्र और न औषध कुछभी तिसके जाप्यके विना सिद्ध नही होवे और तिसी प्रकार संपूर्ण उच्चाटनादिक सिद्ध न होवें ॥४॥ फिरइन मन्त्रोंके प्रभावसे निश्चयकरि संपूर्णवस्तु सिद्धहोतीहै तो लोकमें परस्पर ईर्ष्याकरके अन्याय होजायगा इस लोकशंकाको जानिके शिवजी सब मन्त्रसमुदायकों कीलितकिया॥५॥

स्तोत्रंवैचण्डिकायास्तुतच्चगुप्तंचकारसः ॥ समाप्नोतिसपुण्येनतांयथावन्नियन्त्रणाम् ॥ ६ ॥ सोपिक्षेममवाप्नोतिसर्वमेवन-

संशयः ॥ कृष्णायांवाचतुर्दश्यामष्टम्यांवासमाहितः ॥ ७ ॥ ददातिप्रतिगृह्णातिनान्यथैषाप्रसिद्ध्यति ॥ इत्थंरूपेणकीलेन महादेवेनकीलितम् ॥ ८ ॥ यो निष्कीलां विधायैनांनित्यंज पतिसंस्फुटं ॥ प्रसिद्धःसगणस्सोपिगन्धर्वोजायतेनरः ॥ ९ ॥ नचैवाप्यटतस्तस्यभयंक्वापिहिजायते ॥ नाऽपमृत्युवशंया तिमृतोमोक्षमवाप्नुयात् ॥ १० ॥

टीका—और चंडिकास्तोत्रकों गुप्तकिया और जो पुण्यवान् मनुष्यहै सो पुण्यके प्रभावकरके उस यथावत् नियंत्रणाको प्राप्तहोताहै ॥ ६ ॥ और जो पुरुष कृष्णपक्षकी अष्टमीके और चतुर्दशीके विषे विधिसे सप्तशतीको उपदेश देताहै अथवा ग्रहणकर्त्ताहै वह पुरुष निश्चयकरि क्षेमकों प्राप्तहोताहै और प्रकारसे यह भगवती सिद्ध नही होतीहै इस प्रकारके कीलककरके शिवजीने मन्त्रसमूहको कीलितकिया ॥ ७ ॥ ८ ॥ और जो पुरुष उत्कीलितकरके सुंदरप्रकारसे सप्तशतीको जपताहै सो प्रसिद्ध और गणकरके सहित गन्धर्व होताहै ॥ ९ ॥ और विचरते हुए उस पुरुषको मार्गमें कहूँ भय उत्पन्न नही होताहै और वह मनुष्य अपमृत्युके वश नही प्राप्तहोताहै और मरतेही मोक्षको प्राप्तहोताहै ॥ १० ॥

ज्ञात्वाप्रारभ्यकुर्वीतनकुर्वाणोविनश्यति ॥ ततोज्ञात्वैवसम्प न्नमिदम्प्रारभ्यतेबुधैः ॥ ११ ॥ सौभाग्यादिचयत्किञ्चिद्दृश्यते ललनाजने ॥ तत्सर्वंतत्प्रसादेनतेनजाप्यमिदंशुभम् ॥ १२ ॥ शनैस्तुजप्यमानेस्मिन्स्तोत्रेसम्पत्तिरुच्चकैः ॥ भवत्येवसमग्रा पिततः प्रारभ्यमेवतत् ॥ १३ ॥ ऐश्वर्ययत्प्रसादेनसौभाग्या-रोग्यसम्पदः ॥ शत्रुहानिःपरोमोक्षःस्तूयतेसानकिंजनैः॥१४॥ इति भगवत्याः कीलकस्तोत्रं समाप्तम् ॥ ३ ॥ शुभंभूयात् ॥

टीका—मनुष्य निश्चयात्मक जानिके और विधिसे प्रारंभ करके सप्तश-

तीको अनुष्ठानकरे और विधिसे अनुष्ठान नहीकर्त्ताहुवा मनुष्य नाशको प्राप्त होताहै तिसकारणसे इसको विधान सहित जानिकेही विद्वान् प्रारंभ कर्त्तेहै ॥ ११ ॥ और जो कुछ सौभाग्य आदि स्त्रीजनमें दीखताहै वह सब तुह्मारी कृपा करके है तिसकारणसे तुह्मारा यह शुभस्तोत्र जपना चाहिए ॥ १२ ॥ और धीरेसे यह सप्तशतीस्तोत्र जपे जाते संते अथवा उच्चस्वरसे जपेजाते सन्ते निश्चयकरि मनुष्यके समग्र संपत्ति होतीहै और तबसे लेकरही जिसकी कृपासे ऐश्वर्य सौभाग्य आरोग्य संपत्ति ये होतीहै फिर वह भगवती क्या मनुष्यो करके नहीस्तुति किई जातीहै किन्तु किईही जातीहै ॥ २४ ॥ इति भगवत्याः कीलकस्तोत्रं समाप्तम् ॥ ३ ॥

इति कीलकस्तोत्रं समाप्तम् ।

पुस्तक मिलनेका ठिकाना-
खेमराजश्रीकृष्णदास
"श्रीवेङ्कटेश्वर" छापखाना (मुंबई.)

श्रीः ।

अथ दुर्गासप्तशती

भाषाटीकासमेता ।

मार्कण्डेय उवाच ।

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामयतदु-
त्पत्तिविस्तराद्गदतोमम ॥ १ ॥ महामायानुभावेनयथामन्वं-
तराधिपः ॥ सबभूवमहाभागः सावर्णिस्तनयोरवेः ॥ २ ॥
स्वारोचिषेंतरेपूर्वंचैत्रवंशसमुद्भवः ॥ सुरथोनामराजाभूत्सम-
स्तेक्षितिमण्डले ॥ ३ ॥ तस्यपालयतःसम्यक्प्रजाः पुत्रानि-
वौरसान् ॥ बभूवुःशत्रवोभूपाः कोलाविध्वंसिनस्तदा ॥ ४ ॥

श्रीगणेशाय नमः ॥ श्रीकृष्णचन्द्रो विजयतेतराम् ॥ अथ भाषाटीकेयं सप्तशत्याः ॥ एक समय तपस्या करते हुये महात्मा मुनियोंमें श्रेष्ठ ऐसे जो मार्कण्डेय ऋषि तिनसे बड़े तेजस्वी व्यासजीके शिष्य जैमिनि ऋषि प्रश्न करते भये हे मार्कण्डेय बुद्धिमानोंमें श्रेष्ठ सब शास्त्रमें निपुण सब माहात्म्यनमें बड़ा उत्तम जो देवीका माहात्म्य है ताहि श्रवण करिवेकी मेरी इच्छा है सो आप कृपा करि वर्णनकरो तब मार्कण्डेय ऋषि बोले हे जैमिनि तुमसे एक कथाप्रसंग ऐसा वर्णन करूंहूँ ताके बीचमें देवीहीको बहुत माहात्म्य है ताहि तुम श्रवण करो व्यासआदि ऋषियोंनै सूर्यका पुत्र सावर्णि नाम आठवाँ मनु कहा है ताकी उत्पत्ति विस्तारपूर्वक हमसे श्रवण करो ॥१॥ वह सूर्यका पुत्र सावर्णि मनु महामाया भगवतीकी कृपासे जैसे आठवाँ मन्वन्तरका स्वामी होताभया तैसे आप चरित्र श्रवण करो ॥ २ ॥ पहिले स्वारोचिष मन्वन्तरके मध्यमें चैत्रवंशमें उत्पन्न संपूर्ण भूमण्डलमें चक्रवर्त्ती सुरथ नाम राजा होता भया ॥ ३ ॥ कैसा है वह राजा कि प्रजावोंकी पालना पुत्रोंकैसी तरह करनेवाला ताकी राजधानी नष्ट करनेके लिये यवन भूप शत्रु वन संग्राम वास्ते तयार होते भये ॥ ४ ॥

तस्यैतरभवद्युद्धमतिप्रबलदण्डिनः ॥ न्यूनैरपिसतैर्युद्धेको-
लाविध्वंसिभिर्जितः ॥ ५ ॥ ततःस्वपुरमायातोनिजदेशाधि-
पोभवत् ॥ आक्रान्तः समहाभागस्तैस्तदाप्रबलारिभिः ॥६॥
अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः ॥ कोशोबलंचापहृ-
तंतत्रापिस्वपुरेततः ॥ ७ ॥ ततोमृगयाव्याजेनहृतस्वाम्यः
सभूपतिः ॥ एकाकीहयमारुह्यजगामगहनंवनं ॥ ८ ॥

टी०— फिर राजाका शत्रुवोंके साथ बड़ा युद्ध हुवा वह राजा महा प्रबल शत्रुवोंको वश करनेवालाभी था परन्तु दैवयोगतें निर्बलोंनेभी राजाको जीत लिया ॥ ५ ॥ पीछे संग्रामभूमिमें शत्रुवोंसे हारकर अपनी नगरीमें आते भये अपनो देशहीका स्वामी होताभया ॥ ६ ॥ फिर उस नगरीके विषे दुर्बल वसता हुवा राजा ताका राज्य हरणके लिये दुष्ट मंत्रियोंनें फौज खजाना सब अपने वश करलिये ॥ ७ ॥ ऐसे जब राजाका सर्वस्व ले लिया ताके अनन्तर घोड़ापर बैठ शिकारका बहाना लेकर अकेला गंभीर वनको जाता भया ॥ ८ ॥

सतत्राश्रममद्राक्षीद्विजवर्यस्यमेधसः ॥ प्रशांतश्वापदाकीर्णं
मुनिशिष्योपशोभितं ॥ ९ ॥ तस्थौकंचित्सकालंचमुनिना
तेनसत्कृतः ॥ इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्रमे ॥१०॥
सोचिंतयत्तदातत्रममत्वाकृष्टमानसः ॥ मत्पूर्वैःपालितंपूर्वंम-
याहीनंपुरंहितत् ॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतःपाल्यतेनवा ॥
॥ ११ ॥ नजानेसप्रधानोमेशूरहस्तीसदामदः ॥ ममवैरिवशं
यातःकान्भोगानुपलप्स्यते ॥ १२॥

टी०— फिर वा वनके विषे पशुहिंसासे रहित शान्त स्वभाववाले सिंह वगैरह करिके युक्त मुनिकी शिष्यमण्डलीसे शोभित ऐसा सुमेधा ऋषिका आश्रम देखताभया ॥ ९ ॥ ताके अनन्तर जहां तहां विचरताहुवा मुनिके

आश्रममें पहुँचता भया मुनिने कोमल वचनोंसे राजाका सत्कार किया पश्चात् कुछ काल ता आश्रममें राजा निवासभी करता भया ॥ १० ॥ तब वा आश्रमके विषे ममता करिकै व्याकुल है बुद्धि जिसकी ऐसा जो सुरथ राजा है सो चिन्ता करता भया कि हाय ! जो पुर पहिले मेरे बडोंने वसा कर पालन किया था सो पुर मेरेसे शत्रुवोंने ले लिया फिर इस प्रकार मनमें विचार करने लगा कि निश्चय करिके दुष्ट है चरित्र जिनके ऐसे मेरे मंत्रियोंसे आदि लेकर जे नौकर हैं वे मेरे पुरकी धर्मपूर्वक पालना करतेहैं या नहीं॥ ११ ॥ और मेरा शूर हस्ती जो सदा मत्त रहता था वह मेरा शत्रुवोंके वश होकर कौनसे भोग भोगता होगा ॥ १२ ॥

येममानुगतानित्यंप्रसादधनभोजनैः ॥ अनुवृत्तिंध्रुवंतेद्यकुर्वं-त्यन्यमहीभृताम् ॥ १३ ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततंव्ययम्॥ संचितःसोतिदुःखेनक्षयंकोशोगमिष्यति॥१४॥ एतच्चान्यच्चसततंचिंतयामासपार्थिवः ॥ तत्रविप्राश्रमाभ्याशे वैश्यमेकंददर्शसः ॥ १५ ॥ सपृष्टस्तेनकस्त्वंभोहेतुश्चागम-नेऽत्रकः ॥ सशोकइवकस्मात्त्वंदुर्मनाइवलक्ष्यसे ॥ १६ ॥

टीका—और जे मेरे सेवक धन भोजनादिक से संतुष्ट थे वे अनाथ और राजावोंकी निश्चय करिकै सेवा करते होंगे ॥ १३ ॥ और बडे दुःखसे संचय कियाहुवा जो खजानाहै सो अब बुरीरीतिसें खर्च करनेवाले मंत्रियोंकरिकै नष्ट होजायगा ॥ १४ ॥ इन वार्तोंकों तथा अन्य वार्तोंकों शोच करिकै राजा शोकयुक्त चिन्ता करताभया ता समय वा आश्रमके समीप राजा एक वेश्यको देखताभया ॥१५॥ और पूछने लगा कि हेभाई ! तुम कौनहो ? किसकारणसे इस अश्रममें तुह्मारा आगमन हुवा ? किसकारणसे तुम शोकयुक्तसे दीखतेहो और विमनसे कैसे दीखतेहो ॥ १६ ॥

इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितम् ॥ प्रत्युवाचसतंवै-श्यःप्रश्रयावनतोनृपं ॥ १७ ॥ वैश्यउवाच ॥ समाधिर्नाम

वैश्योहमुत्पन्नोधनिनांकुले ॥ पुत्रदारैर्निरस्तश्चधनलोभादसा-
धुभिः ॥ १८ ॥ विहीनश्चधनैर्दारैःपुत्रैरादायमेधनम् ॥ वनम-
भ्यागतोदुःखीनिरस्तश्चाप्तबन्धुभिः ॥ १९ ॥ सोहंनवेद्मिपुत्रा-
णांकुशलाकुशलात्मिकाम् ॥ प्रवृत्तिंस्वजनानांचदाराणांचा-
त्रसंस्थितः ॥ २० ॥

टीका— ऐसे कोमल वचन राजाके श्रवण करिकै वैश्य विनयपूर्वक बोलताभया॥१७॥वैश्य बोला हे राजन् मैं समाधिनाम वैश्यहूँ और धनवानोंके वंशमें उत्पन्न हुवाहूँ धनलोभसे पुत्र स्त्री स्वजनों करिकै तिरस्कृतहूँ ॥१८॥ और संपूर्ण स्त्री पुत्र बंधु परिवारने मेरा धन छीनकर तिरस्कार किया सो धनहीन दुःखी होकर दशोंदिशाँमें भ्रमताहुवा वनमें आयाहूँ और पुत्रादिकनसे वियुक्तहूं इसकारणसे मैं शोकयुक्तहूँ ॥ १९ ॥ और मैं या वनके बीचमें स्थित हुवा स्त्री पुत्र मित्रादिकनकी कुशल क्षेमकी वार्त्ताभी नहीं जानताहूँ ॥ २० ॥

किंनुतेषांगृहेक्षेममक्षेमंकिंनुसांप्रतम् ॥ कथंतेकिंनुसद्वृत्तादुर्वृ-
त्ताःकिंनुमेसुताः ॥ २१ ॥ राजोवाच ॥ यैर्निरस्तोभवाँल्लुब्धैः
पुत्रदारादिभिर्धनैः॥तेषुकिंभवतः स्नेहमनुबध्नातिमानसम्२२
वैश्यउवाच ॥ एवमेतद्यथाप्राहभवानस्मद्गतंवचः ॥ किंकरो
मिनबध्नाति ममनिष्ठुरतांमनः ॥ २३ ॥ यैःसन्त्यज्यपितृस्ने
हंधनलुब्धैर्निराकृतः॥पतिस्वजनहार्दंचहार्दितेष्वेवमेमनः॥२४॥

टीका— और स्त्री पुत्र बंधु जनोंके घरमें कुशलहै या नहीं अब यह वार्त्ता कैसे निश्चय करूं वे मेरे पुत्र जे हैं ते सुमार्गमे हैं या कुमार्गमें यह दोनो वार्त्ता मेरेकों कैसे निश्चय होंय ॥ २१ ॥ तब सुरथराजा बोलते भये कि हे वैश्य ! धनके लोभते स्त्री पुत्रादिकोंने तुह्मारा निरादर किया ऐसे कुटिल स्त्री पुत्रादिकनके विषे तुह्मारा चित्त स्नेह कैसे करताहै॥ २२ ॥ वैश्यने कहा कि हे राजन् ! जैसा आपने कहा वह ऐसाही है परंतु मैं क्या करूं मेरा मन कठोरताको नहीं धारणकरता ॥ २३ ॥ धनके लोभी जिन दुष्टोंने पिताका स्नेह

और स्त्रीनें पतिका स्नेह छोडकर मुझको निकालदिया फिर भी तिनमेंही मेरा मन स्नेहयुक्तहे ॥ २४ ॥

किमेतन्नाभिजानामिजानन्नपिमहामते ॥ यत्प्रेमप्रवणंचित्तंवि
गुणेष्वपिबंधुषु ॥ २५ ॥ तेषांकृतेमेनिःश्वासोदौर्मनस्यंचजा-
यते ॥ करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरम् ॥ २६ ॥
मार्कंडेयउवाच ॥ ततस्तौसहितौविप्रतंमुनिंसमुपास्थितौ ॥
समाधिर्नामवैश्योसौसचपार्थिवसत्तमः ॥ २७ ॥ कृत्वातुतौ
यथान्यायंयथार्हंतेनसंविदम् ॥ उपविष्टौकथाःकाश्चिचक्रतुर्वै
श्यपार्थिवौ ॥ २८ ॥

टीका—हेराजन् ! गुण करिके हीन जे मेरे बन्धु हैं तिनके विषेभी मेरा चित्त प्रेमयुक्तहे यह जानताहुवाभी मैं चित्तको रोक नहींसकताहूँ ॥ २५ ॥ हे राजन् और मेरे विषे जिनकी प्रीति नहीं ऐसे जे मेरे पुत्रादिकहैं तिनके लिये मेरेको शोक और चित्तको ग्लानिहे मैं क्याकरूं मेरा चित्त उनके विषे कठोरता धारण नही करताहे ॥ २६ ॥ मार्कण्डेयऋषि बोले· हेजैमिनि ता प्रसंगके अनंतर मित्रभावसे समाधिनाम वैश्य और सुरथराजा ये दोनो सुमे धाऋषिके समीप जा पहुँचे ॥ २७ ॥ फिर· वे दोनोजनोंने यथाशास्त्र और यथायोग्य मुनीश्वरसे संभाषणादि किया फिर मुनीने कोमलवाणीसे सत्कार पूर्वक बैठालिये फिर ये मुनीश्वरसे अपने स्वार्थकी वार्त्ता पूंछतेभये ॥२८॥

राजोवाच॥भगवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्वतत् ॥ दुःखा-
ययन्मेमनसःस्वचित्तायत्ततांविना ॥ २९ ॥ ममत्वंगतराज्य
स्यराज्यांगेष्वखिलेष्वपि ॥ जानतोपियथाज्ञस्यकिमेतन्मुनि
सत्तम ॥ ३० ॥ अयंचनिकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥
स्वजनेनचसंत्यक्तस्तेषुहार्दीतथाप्यति ॥३१॥ एवमेषतथाहं
चद्वावप्यत्यंतदुःखितौ॥दृष्टदोषेपिविषयेममत्वाकृष्टमानसौ ३२॥

टीका—राजा बोले कि हे भगवन् तुह्मारेसे एक रहस्य पूछनेकी इच्छा .

करूंहूं ताहि तुम कहो मेरे चित्तकी अपने निश्चयात्मक स्वरूपके विषे एकाग्रता विना जो अवस्थाहै सो दुःख देरहीहै ॥ २९ ॥ हे मुनिसत्तम! राज्य मेरा चलगया यह मैं जानताभीहूँ परंतु स्वामी, अमात्य, सुहृत्, कोश, राष्ट्र दुर्ग बल ये सात राज्यके अंगहै तिनके विषे मेरी अज्ञानीकीसी तरह ममताहै सो क्या कारणहै ॥ ३० ॥ और यह जो वैश्यहै सो पुत्र कलत्रादिकन करिकै तथा भ्रात्रादिकन करिकै त्यक्तहै तौभी उनके विषे अति स्नेहवान्है ॥ ३१ ॥ और हेमुनिसत्तम! ऐसे यह तथा मैं दोनो दुःखी तहाँ देखाहै दोष जाके विषे ऐसे राज्यादिकनके विषेभी ममत्व करिकै आधीनहै मन जिनका ऐसे हमहैं ॥३२॥

तत्किमेतन्महाभाग यन्मोहोज्ञानिनोरपि ॥ ममास्यचभवत्येषाविवेकांधस्यमूढता ॥ ३३ ॥ ऋषिरुवाच ॥ ज्ञानमस्तिसमस्तस्यजंतोर्विषयगोचरे ॥ विषयाश्चमहाभागयांतिचैवंपृथक्पृथक् ॥ ३४ ॥ दिवांधाःप्राणिनःकेचिद्रात्रावंधास्तथापरे॥ केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ॥३५॥ ज्ञानिनोमनुजाःसत्यंकिंनुतेनहिकेवलं॥यतोहिज्ञानिनःसर्वेपशुपक्षिमृगादयः॥

टीका—सो हेमहाभाग हे मुने जिस कारणसे हम दोनो ज्ञानवानोंकोंभी मोहहै यह क्या कारणहै जा मोहते यह विवेकरहित मनुष्यके योग्य जो अज्ञानता सो हमको होरहीहै ॥ ३३ ॥ तव ऋषि बोले कि हेराजन्! समस्त प्राणियोंकों इंद्रियके विषयमे ज्ञानहै और मोक्षके विषे ज्ञान नहींहै और हे महाभाग इन्द्रियनकी जे वृत्तिहैं ते पृथक् पृथक् विषयताको प्राप्त होरहीहैं ॥३४॥ हेराजन्! कितेक उलूकादिक प्राणी दिनमें दृष्टि हीनहैं और कित्तेक काकादिक प्राणी रात्रिके विषे दृष्टिहीनहैं और कित्तेक प्राणी अश्वसे आदि लेकर रात्रि दिनके विषे तुल्य दृष्टिवालेहैं ॥ ३५ ॥ हेराजन्! तुमने कहा कि मनुष्य ज्ञानीहैं सो सत्यहै परंतु केवल मनुष्यही ज्ञानी नहींहै किन्तु मनुष्योंते अन्य पशु पक्षी मृगादिक ये सब ज्ञानी हैं ॥ ३६ ॥

ज्ञानंचतन्मनुष्याणांयत्तेषांमृगपक्षिणाम्॥मनुष्याणांचयत्तेषां
तुल्यमन्यत्तथोभयोः॥३७॥ज्ञानेपिसतिपश्यैतान्पतङ्गाञ्छा-
वचंचुषु॥कणमोक्षाहृतान्मोहात्पीड्यमानानपिक्षुधा॥ ३८॥
मानुषामनुजव्याघ्रसाभिलाषाःसुतान्प्रति॥ लोभात्प्रत्युपका
रायनन्वेतान्किंनपश्यसि॥ ३९॥ तथापिममतावर्तेमोहगर्ते
निपातिताः॥ महामायाप्रभावेणसंसारस्थितिकारिणा॥४०॥

टी०- हे राजन्! जो स्वभावोत्पन्न ज्ञान मृग पक्षियोंको है वह मनुष्य-नको नहीं है और मनुष्यनको जो शास्त्रोक्त ज्ञान है सो मृग पक्षियोंको नहीं है और आहार निद्रा विषयादि ज्ञान मनुष्य मृग पक्षी इत्यादिकनको समान है॥ ३७॥ और हे राजन् क्षुधा करिकै पीडित जे पक्षी हैं तिनको यह ज्ञान-भी है कि जे कण पुत्रोंके मुखमें गेरिवे योग्य हैं ते कण हम भक्षण करितें तो क्षुधा हमें बाधा नहीं करैं तौभी मोहते अपने पुत्रोंके चंचुवोंमें कण गेरदेते हैं इन्हें तुम देखो ॥ ३८ ॥ और हे मनुजव्याघ्र वृद्धावस्थामें ये हमारी सेवा करेंगे इस प्रयोजनके लोभते पुत्रनके विषे मनुष्य कामनासहित व्है रहैं और इन्हे पशु पक्षी मृगादिक केवल ममतासेही पुत्रनके विषे आदरयुक्त हैं इन्हे तुम नहीं देखते हो और पुत्र प्रत्युपकारके लिये नहीं होतेहैं यह क्या तुम नहीं देखते हो ॥ ३९ ॥ हे राजन्! तौभी संसारकी पालना करनेवाला ऐसा जो महामायाका प्रभाव ताने या संसार रूपी समुद्रके ममतारूपी भँवरके मोहरूपी जो खाडा ताके विषे मनुष्यनको पटकरक्खे है ॥ ४० ॥

तन्नात्रविस्मयःकार्योयोगनिद्राजगत्पतेः ॥ महामायाहरेश्चै
षातयासंमोह्यतेजगत्॥ ४१॥ ज्ञानिनामपिचेतांसिदेवीभग-
वतीहिसा॥ बलादाकृष्यमोहायमहामायाप्रयच्छति॥ ४२॥
तयाविसृज्यतेविश्वंजगदेतच्चराचरम्॥ सैषाप्रसन्नावरदानृणां
भवतिमुक्तये॥ ४३॥ साविद्यापरमामुक्तेर्हेतुभूतासनातनी॥
संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरी॥ ४४॥

टी०– सो या बातके विषे आश्चर्य करना योग्य नहीं क्यों कि जगत्के स्वामी विष्णुकी जो योगनिद्रा महामाया है ताने जगत्को मोहित कर राखा है ॥ ४१ ॥ हे राजन् ! कैसी है वह महामाया कि उपनिषदोंके विषे वर्णन किया जो ज्ञान है ताका अनुभव करनेवाले ऐसे जे ज्ञानवान् पुरुष हैं तिन केभी चित्तनको बलसे खैंच कर ममताके आधीन करती है ॥ ४२ ॥ फिर हे राजन् ! वह भगवती कैसी है कि ता करिकै समस्त चराचर जगत् रचा जाता है सो यह प्रसन्न होनेसे मनुष्यनको वरदान और मोक्ष देतीहै ॥ ४३ ॥ परन्तु हे राजन् उस मायाके दो भेद हैं एक तो विद्या और दूसरी अविद्या जो अविद्या रूपा माया है सो संसारके बन्धनमें कारण है और ब्रह्मादिकन कीभी स्वामिनी है और जो सनातनी विद्या रूपा माया है सो मोक्षका कारण है ॥ ४४ ॥

राजोवाच ॥ भगवन्काहिसादेवीमहामायेतियांभवान् ॥ ब्रवीतिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज ॥ ४५ ॥ यत्प्रभावाचसादेवीयत्स्वरूपायदुद्भवा ॥ तत्सर्वंश्रोतुमिच्छामित्वत्तो ब्रह्मविदांवर ॥ ४६ ॥ ऋषिरुवाच ॥ नित्यैवसाजगन्मूर्तिस्तयासर्वमिदंततम् ॥ तथापितत्समुत्पत्तिर्बहुधाश्रूयतांमम ॥ ४७ ॥देवानांकार्यसिद्ध्यर्थमाविर्भवतिसायदा ॥ उत्पन्नेतितदालोकेसानित्याप्यभिधीयते ॥ ४८ ॥

टीका– तब राजा बोले हे भगवन् हे द्विज वह कौनसी देवी है जिसको आप महामाया कहतेहैं और कैसे उत्पन्न भई है इसका क्या कर्म है और क्या पराक्रम है ॥ ४५ ॥ और हे ब्रह्मवेत्ताओंमें श्रेष्ठ उस देवीका कैसा सामर्थ्य है और कैसा स्वरूप है और कैसा प्रादुर्भाव है ये संपूर्ण बात तुमसे श्रवण करिबेकी मेरी इच्छा है ॥ ४६ ॥ तब ऋषि बोले संपूर्ण जगत्की आश्रयभूत शक्ति जा करिकै जगत् रचाहुवा है वह किसी करिकै रचित नहीं है तौभी बहुधा लोकके उपकारके वास्ते वाकी उत्पत्ति मेरेसे श्रवण

करो ॥ ४७॥ हे राजन्! जब देवतानके कार्यकी सिद्धिके लिये प्रकट होती है तब वह नित्यभी है परन्तु लोकमें उत्पन्न भई है यह कहा जाता है॥४८॥

योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते ॥ आस्तीर्यशेषमभजत्कल्पांतेभगवान्प्रभुः ॥ ४९ ॥ तदाद्वावसुरौ घोरौ विख्यातौमधुकैटभौ॥विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ ॥५० ॥ सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजापतिः ॥ दृष्ट्वातावसुरौ चोग्रौप्रसुप्तंचजनार्दनम् ॥ ५१ ॥ तुष्टावयोगनिद्रांतामेकाग्रहृदयःस्थितः ॥ विबोधनार्थायहरेर्हरिनेत्रकृतालयां ॥५२ ॥

टीका– हे राजन् ब्रह्माके दिनके अनन्तर जो प्रलय ताकेविषे जब सात समुद्र करिके जुदा जुदा स्थापन किया हुवा जगत् एकार्णवताको प्राप्त हो गया ता समयकेविषे भगवान् ऐश्वर्यादिकनकरिकै सहित शेषशय्या बिछाय कर योगनिद्राका सेवन करते भये अर्थात् शयन करते भये ॥ ४९ ॥ ता शयनसमयकेविषे विष्णुके कानोंके मैलसे मधु और कैटभ ये दो दैत्य उत्पन्न होते भये और ब्रह्माके मारनेको तयारभये ॥ ५० ॥ तब वह ब्रह्मा विष्णुकी नाभिकमलमें स्थित हुवा बड़े भयंकर असुरोंको देखकर और भगवान्को योगनिद्रासे शयन करता हुवा देखकर ॥ ५१ ॥ एकाग्र चित्त होयकर विष्णुके जगानेके लिये हरिके नेत्रोंमें कियो है निवास जाने ऐसी जो योगनिद्रा है ताकी स्तुति करतो भयो ॥ ५२ ॥

विश्वेश्वरींजगद्धात्रींस्थितिसंहारकारिणीम् ॥ निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः ॥ ५३ ॥ ब्रह्मोवाच ॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारःस्वरात्मिका ॥ सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता ॥ ५४ ॥ अर्धमात्रास्थितानित्यायानुच्चार्याविशेषतः ॥त्वमेवसंध्यासावित्रीत्वंदेविजननीपरा॥५५॥ त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत् ॥ त्वयैतत्पाल्यतेदेवित्वमत्स्यंतेचसर्वदा ॥ ५६ ॥

टीका– ब्रह्मा बोले अनंत है तेज जिनका ऐसे जे विष्णु तिनकी योगनिद्रा जो तुम हो तुह्मारी मैं स्तुति करता हूँ केसी हो आप संसारकी रचनेवाली फिर कैसी हो आप जगत्का पोषण करनेवाली फिर केसी हो आप जगत्का पालन और संहार करनेवाली ॥ ५३ ॥ फिर कैसी हो आप देवतावोंको हविर्दानमें स्वाहा मन्त्ररूप हो और पित्रीश्वरोंको अन्नदानमें स्वधा मन्त्ररूप हो और वषट्काररूप हो अर्थात् यज्ञरूप हो फिर कैसी हो तुम अकारसे आदि लेकर जे सोलह स्वर हैं तेई हैं स्वरूप जाको ऐसी हो फिर कैसी हो देवतावोंके अन्नस्वरूप हो हे वृद्धि ह्रास करिके रहित हे नित्ये ब्राह्मी वैष्णवी माहेश्वरी ये लोकमाता है स्वरूप जाको इस तरह तीन प्रकारसे विराजमान हो ॥ ५४ ॥ हे भगवती फिर तुम कैसी हो जाग्रत्, स्वप्न, सुषुप्ति इन तीन अवस्थासे जुदी चौथी अवस्थाको प्राप्त ॐकारकेविषे अर्धमात्रारूप विराजमान हो और नित्य हो और आप परमात्मस्वरूप हो याते विशेषकरिके वर्णन नहीं करी जाती हो फिर कैसी हो संध्यारूप हो और सावित्री रूप हो और वेदोंकी माता गायत्रीरूप तुम हो ॥ ५५ ॥ फिर कैसी हो संपूर्ण जगत्को धारण करती हो और ब्राह्मी शक्तिरूपकरिके जगत् रचती हो और वैष्णवी शक्तिरूपसे पालना करती हो और माहेश्वरी शक्तिरूपसे प्रलयविषे जगत्का संहार करती हो फिर भक्तोंको सर्व वस्तु देतीहो ५६ ॥

विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने ॥ तथासंहृतिरूपांतेजगतोस्यजगन्मये ॥ ५७ ॥ महाविद्यामहामायामहामेधामहास्मृतिः ॥ महामोहाचभवतीमहादेवीमहेश्वरी॥प्रकृतिस्त्वंचसर्वस्यगुणत्रयविभाविनी॥५८॥कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा ॥ ५९ ॥ त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वं बुद्धिर्बोधलक्षणा॥लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षांतिरेवच ६०॥

टीका– हे जगन्मये फिर कैसी हो विशेषकरिके, जगत्के रचनेमें सृष्टिरूप तुम हो और पालनेविषे स्थितिरूप हो और संहारकेविषे संहृतिरूप

हो ॥ ५७ ॥ और परब्रह्मको जाननेवाला ज्ञानरूप तुम हो और शरीरादि-कोंके विषे जो आत्मबुद्धि ऐसी महामायारूप तुम हो और ध्यानरूप हो और महाममतारूप हो ऐश्वर्य युक्त हो और समस्त देवशक्तिरूप हो और हिरण्याक्षादि शक्तिरूप हो ॥ ५८ ॥ जाके विषे विश्वको लय होय ऐसी कालरात्रि रूप तुम हो और जाके विषे ब्रह्माको मोक्ष होय ऐसी महारात्रि रूप तुम हो और संसारको रचनेवाली मोहरात्रिरूप तुम हो ॥ ५९ ॥ फिर कैसी हो श्रीः लक्ष्मीबीजरूप हो क्लीं कामबीजरूप तुमहो त्वं ह्रीः अर्थात् तुम भुवनेशी बीजरूपतुम हो निर्णयात्मक है स्वरूप जाको ऐसा अंतःकरणरूपी तुम हो और लज्जारूप हो पुष्टिरूप हो संतोष रूप हो शांतिरूप हो अर्थात् विषयोंसे इन्द्रि-योंका त्यागरूपी तुम हो और शांतिरूप हो अर्थात् सामर्थ्य होता सता अप-राध सहिष्णुतारूपी तुम हो ॥ ६० ॥

खड्गिनीशूलिनीघोरागदिनीचक्रिणीतथा ॥ शंखिनीचापिनी-वाणभुशुंडीपरिघायुधा ॥ ६१ ॥ सौम्यासौम्यतराशेषसौ-म्येभ्यस्त्वतिसुंदरी॥परापराणांपरमात्वमेवपरमेश्वरी ॥६२॥ यच्चकिंचित्क्वचिद्वस्तुसदसद्वाखिलात्मिके ॥ तस्यसर्वस्यया शक्तिःसात्वंकिंस्तूयसेमया॥६३॥ययात्वयाजगत्स्रष्टाजगत्पा-त्यत्तियोजगत्॥सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः ६४॥

टीका– खड्ग, त्रिशूल, गदा, चक्र, शंख, धनुष, वाण, भुशुंडी, परिघ इन शस्त्रोंको धारण करनेवालीहो और एक शत्रुको मुंड लेराखो याते बडी भयं-कर रूपहो ॥ ६१ ॥ फिर कैसीहो भक्तोंकेविषे सौम्यरूप अर्थात् शांतरूपहे और दैत्योंके क्रूररूपहो और संपूर्ण सुन्दर वस्तुवोंसे बडी सुन्दरहो और पश्यंती मध्यमा वैखरी इनका बीज रूप हो उत्कृष्ट जेहैं तिनमें परमप्रधान तुमही हो याते तुम परमेश्वरीहो ॥ ६२ ॥ हे अखिलात्मिके देवि या जगत्के विषे जो कुछ कहूँ सत् असत् वस्तु प्रतीत होताहै ता संपूर्णकी शक्ति अर्था-त् सामर्थ्य तुमही हो याते अस्मदादिकरिकै कैसे स्तुति कियेजावो ॥ ६३ ॥

और ब्रह्म, विष्णु, रुद्ररूप करिकै जगत्का उत्पत्ति पालन संहार करनेवाला जो भगवान्है सोभी तुमने निद्राके वशकरदिया याते तुह्मारी स्तुति करनेको कौन समर्थहै ॥ ६४ ॥

